व्यादिपरमाणवः खरस्नेहोष्णप्रेरणस्वभावाः ते पृथिव्यादिभावेन संहन्यन्त इति मन्यन्ते तथा रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकाः पञ्च स्कन्धाःतेऽप्यध्यात्मं सर्व्वव्यवहारास्पदभावेन संहन्यन्ते इति मन्यन्ते । तत्रेदमभिधीयते । योऽयमुभयहेतुक उभयप्रकारः समुदायः परेषामभिप्रेतोऽणुहेतुकश्च भूतभौतिकसंहतिरूपः पञ्चस्कन्धहेतुकश्च पञ्चस्कन्धरूपः । तस्मिन् उभयहेतुकेऽपि समुदायेऽभिप्रेयमाणे तदप्राप्तिः स्यात् समुदायाप्राप्तिः समुदायिनामचेतनत्वात् चित्ताभिज्वलनस्य च समुदयसिद्ध्यधीनत्वात् अन्यस्य च कस्यचिच्चेतनस्य भोक्तुः प्रशासितुर्व्वा स्थिरस्य संहन्तुरनभ्युपगमात् निरपेक्षप्रवृत्त्यभ्युपगमे च प्रवृत्त्यनुपरमप्रसङ्गात् । आशयस्याप्यन्यत्वानन्यत्वाभ्यामनिरूप्यत्वात् क्षणिकत्वाभ्युपगमाच्च निर्व्यापारत्वात् तत्प्रवृत्त्यनुपपत्तेः तस्मात् समुदायानुपपत्तिः । समुदायानुपपत्तौ च तदाश्रया लोकयात्रा लुप्येत । "इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्" सू० । यद्यपि भोक्ता प्रशासिता वा कश्चिच्चेतनः संहन्ता स्थिरो नाभ्युपगम्यते तथाप्यविद्यादीनामितरेतरकारणत्वादुपपद्यते लोकयात्रा तस्याञ्चोपपद्यमानायां न किञ्चिदपरमपेक्षितव्यमस्ति । ते चाविद्यादयः अविद्या संस्कारो विज्ञानम् नाम रूपं षडायतनम् स्पर्शो वेदना तृष्णोपादानम् भवो जातिर्जरा मरणं शोकः परिवेदना दुःखं दुर्मनस्तेत्येवम् जातीयका इतरेतरहेतुकाः सौगते समये क्वचित् संक्षिप्ता निर्दिष्टाः क्वचित् प्रपञ्चिताः । सर्व्वेषामप्ययमविद्यादिकलापोऽप्रत्याख्येयः । तदेवमविद्यादिकलापेऽपि परस्परनिमित्त नैमित्तिकभावेन घटीयन्त्रवदनिशमावर्त्तमानेऽर्थाक्षिप्त उपपन्नः संघात इति चेत्तन्न कस्मात्? उत्पत्तिमात्र निमित्तत्वात् । भवेदुपपन्नः संघातो यदि संघातस्य किञ्चिन्निमित्तमवगम्येत न त्ववगम्यते यत इतरेतरप्रत्ययत्वेऽप्यविद्यादीनां पूर्व्वं पूर्व्वमुत्तरस्योत्तरस्योत्पत्तिमात्र निमित्तं भवत् भवेत् न तु संघातोत्पत्तेः किञ्चिन्निमित्तं सम्भवति । नन्वविद्यादिभिरर्थादाक्षिप्यते संघात इत्युक्तम् अत्रोच्यते । यदि तावदयमभिप्रायः अविद्यादयएव संघातमन्तरेणात्मानमलभमाना अपेक्षन्ते संघातमिति ततस्तस्य संघातस्य किञ्चिन्निमित्तं वक्तव्यं तच्च नित्येष्वप्यणुष्वभ्युपगम्यमानेष्वाश्रयाश्रयीभूतेषु च भोक्तृषु सत्सु न सम्भवतीत्युक्तं वैशेषिकपरीक्षायां किमङ्ग पुनः क्षणिकेष्वणुषु भोक्तृरहितेष्वाश्रयाश्रयीभावशून्येषु चाभ्युपगम्यमानेषु सम्भवेत् । अथायमभिप्रायः अविद्यादय एव संघातस्य निमित्तमिति । कथं तमेवाश्रित्यात्मानं लभमानास्तस्यैव निमित्तं स्युः । अथ मन्यसे संघात एवानादौ संसारे सन्तत्यानुवर्त्तते तदाश्रयाश्चाविद्यादय इति । तदपि संघातात् संघातान्तरमुत्पद्यमानं नियमेन सदृशमेवोत्पद्येत अनियमेन वा सदृशम्, विसदृशं वोत्पद्येत । नियमाभ्युपगमे मनुष्यपुद्गलस्य देवतिर्यग्योनिनारकप्राप्त्यभावः प्राप्नुयात् । अनियमाभ्युपगमेऽपि मनुष्यपुद्गलः कदाचित् क्षणेन हस्ती भूत्वा देवो वा पुनर्मनुष्यो भवेत् इति प्राप्नुयात् । उभयमभ्युपगमविरुद्धम् । अपि च यद्भोगार्थः संघातः स्यात् स जीवो नास्ति स्थिरो भोक्तेति तवाभ्युपगमः ततश्च भोगो भोगार्थएव स चान्येन प्रार्थनीयः तथा मोक्षो मोक्षार्थ एवेति मुमुक्षुणा नान्येन भवितव्यम् । अन्येन चेत् प्रार्थ्येतोभयं, भोगमोक्ष कालावस्थायिना तेन भवितव्यम् । अवस्थायित्वे क्षणिकत्वाभ्युपगमविरोधः । तस्मादितरेतरोत्पत्तिमात्रनिमित्तत्वमविद्यादीनां यदि भवेत् भवतु नाम न तु संघातः सिध्येत् भोक्त्रभावादित्यभिप्रायः इत्यन्तेन" । एतन्मतमनुसृत्यैव "सर्व्वकार्य्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम् । सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृतामिति" माघः । आत्मनो देहपरिमाणत्वमार्हता मन्यन्ते । तदेतन्मतमुत्थाप्य दूषितं शा०सू०भा० यथा । "एवं चात्माकात्स्न्र्यम्" सू० । "यथैकस्मिन् धर्म्मिणि विरुद्धधर्म्मासम्भवो दोषः स्याद्वादे प्रसक्तः एवमात्मनोऽपि जीवस्याकात्स्न्र्यमपरो दोषः प्रसज्यते । कथं शरीरपरिमाणो हि जीव इत्यार्हता मन्यन्ते । शरीरपरिमाणतायाञ्च सत्यामकृत्स्नोऽसर्व्वगतः परिच्छिन्न आत्मेत्यतो घटादिवदनित्यत्वमात्मनः प्रसज्येत । शरीराणाञ्चानवस्थितपरिमाणत्वान्मनुष्यजीवो मनुष्यशरीरपरिमाणो भूत्वा पुनः केनचित् कर्म्मविपाकेन हस्तिजन्म प्राप्नुवन्न कृत्स्नं हस्तिशरीरं व्याप्नुयात् पुत्तिकाजन्म च प्राप्नुवन्न कृत्स्नः पुत्तिकाशरीरे संमीयते । समान एष एकस्मिन्नपि जन्मनि कौमारयौवनस्थाविरेषु दोषः । स्यादेतत् अनन्तावयवो जीवस्तस्य तएवावयवा अल्पे शरीरे सङ्कुचेयुर्महति विकसेयुरिति । तेषां पुनरनन्तानां जीवावयवानां समानदेशत्वं प्रतिहन्येत वा न वेति वक्तव्यम् । प्रतिघाते तावन्नानन्तावयवाः परिच्छिन्ने देशे सम्मीयेरन् । अप्रतिघातेऽप्येकावयवदेशत्वोपपत्तेः सर्व्वेषाम-